श्री शारदा दशकं

श्री शारदा दशकं

करवाणि वाणि किं वा
जगति प्रचयाय धर्ममार्गस्य |
कथयाशु तत्करोम्यह-
-महर्निशं तत्र मा कृथा विशयं || 1 ||

गणनां विधाय मत्कृत-
-पापानां किं धृताक्षमालिकया |
तांताद्याप्यसमाप्ते-
-र्निश्चलतां पाणिपंकजे धत्से || 2 ||

विविधाशया मदीयं
निकटं दूराज्जनाः समायांति |
तेषां तस्याः कथमिव
पूरणमहमंब सत्वरं कुर्यां || 3 ||

गतिजितमरालगर्वां
मतिदानधुरंधरां प्रणम्रेभ्यः |
यतिनाथसेवितपदा-
-मतिभक्त्या नौमि शारदां सदयां || 4 ||

जगदंबां नगतनुजा-
-धवसहजां जातरूपतनुवल्लीं |
नीलेंदीवरनयनां
बालेंदुकचां नमामि विधिजायां || 5 ||

भारो भारति न स्या-
-द्वसुधायास्तद्वदंब कुरु शीघ्रं |
नास्तिकतानास्तिकता-
-करणात्कारुण्यदुग्धवाराशे || 6 ||

निकटे वसंतमनिशं
पक्षिणमपि पालयामि करतोऽहं |
किमु भक्तियुक्तलोका-
-निति बोधार्थं करे शुकं धत्से || 7 ||

शृंगाद्रिस्थितजनता-
-मनेकरोगैरुपद्रुतां वाणि |
विनिवार्य सकलरोगान्
पालय करुणार्द्रदृष्टिपातेन || 8 ||

मद्विरहादतिभीतान्
मदेकशरणानतीव दुःखार्तान् |
मयि यदि करुणा तव भो
पालय शृंगाद्रिवासिनो लोकान् || 9 ||

सदनमहेतुकृपाया
रदनविनिर्धूतकुंदगर्वालिं |
मदनरिपुसहोत्थां
सरसिजभवभामिनीं हृदा कलये || 10 ||

इति श्रीसच्चिदानंदशिवाभिनवनृसिंहभारतीस्वामिभिः विरचितं श्री शारदा दशकं ||